सोमकस्य शुभं वर्षं विज्ञेयं कुसुमोत्तरम् ॥
तदेव शिवमित्युक्तं वर्षं सोमकसंज्ञितम् ।
आम्बिकेयस्य मेदाकिं क्षेमकञ्चैव तत् स्मृतम् ॥
सेतुपर्व्वतकस्यापि महाद्रुममिति स्मृतम् ।
तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम् ॥
द्वीपस्य परिणाहश्च ह्रस्वदीर्घत्वमेव च ।
जम्बुद्वीपेन संख्यातस्तस्य मध्ये वनस्पतिः ॥
शाको नाम महांश्चैव तस्य प्रजा महानुगाः ।
एतेषु देवगन्धर्व्वाः सिद्धाश्च सह चारणैः ॥
विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह ।
तत्र पुण्या जनपदाश्चातुर्व्वर्ण्यसमन्विताः ॥
तेषु नद्यस्तु वै सप्त प्रतिवर्षं समुद्रगाः ।
द्विनाम्नश्चैव ताः सर्व्वा गङ्गाः सप्तविधाः स्मृताः ॥
प्रथमा सुकुमारीति गङ्गा शिवजला शुभा ।
अनुतप्ता च नाम्नैषा नदी संपरिकीर्त्तिता ॥
सुकुमारी तपःसिद्धा द्वितीया नामतः सती ।
नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥
शिवलोका चतुर्थी स्यात् त्रिविधा च पुनः स्मृता ।
इक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः कुहूः ॥
धेनुका च स्मृता चैव षष्ठी संपरिकीर्त्तिता ।
सुव्रता च गभस्ती च सप्तमी परिकीर्त्तिता ॥
एताः सप्त महाभागा प्रतिवर्षं शिवोदकाः ।
पावयन्ति जनं सर्व्वं शाकद्वीपनिवासिनम् ॥
अभिगच्छन्ति ताश्चान्या नदीर्नद्यः सरांसि च ।
बहूदकपरिस्रावा यतो वर्षति वासवः ॥
आसान्तु नामधेयानि परिमाणं तथैव च ।
न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः ॥
ताः पिबन्ति महाहृष्टा नदीर्जनपदास्तु ते ।
ये ते शान्तभया प्रोक्ताः प्रमोदाश्चेति वै शिवाः ॥
आनन्दाश्च सुखाश्चैव क्षेमकैश्च ध्रुवैः सह ।
वर्णाश्रमाचारयुक्ता देशास्ते सप्त विश्रुताः ॥
अरोगा बलिनश्चैव सर्व्वे मरणवर्ज्जिताः ।
अवसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः ॥
न तत्रास्ति युगावस्था चतुर्युगकृता क्वचित् ।
त्रेतायुगसमः कालस्तथा तत्र प्रवर्त्तते ॥
शाकद्वीपादिषु ज्ञेयं पञ्चस्वेतेषु सर्व्वशः ।
देशस्य तु विचारेण कालः स्वाभाविकः स्मृतः ॥
न तेषु सङ्करः कश्चिद्वर्णाश्रमकृतः क्वचित् ।
धर्म्मस्याव्यभिचारेण एकान्तसुखिताः प्रजाः ॥
न तेषु माया लोभो वा ईर्ष्यासूया भयं तथा ।
विपर्य्ययो न तेष्वस्ति तद्वै स्वाभाविकं स्मृतम् ॥
कालो न चैव तेष्वस्ति न दण्डो न च दाण्डिकः ।
स्वधर्म्मेण च धर्म्मज्ञास्ते रक्षन्ति परस्परम् ॥"

इति मात्स्ये १०२ अध्यायः ॥ * ॥

अपि च । एवं परस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो,द्वात्रिंशल्लक्षयोजनायामः समानेन दधिमण्डोदेन परीतः । यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः । यस्य हि महासुरभिगन्धस्तद्वीपमनुवासयति । तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः । सोऽपि विभज्य सप्त वर्षाणि पुत्त्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश । एतेषां वर्षमर्य्यादागिरयो नद्यश्च सप्त सप्तैव । ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोता देवपालो महानस इति । अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति । तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते । इति श्रीभागवते ५ स्कन्धे २० अध्यायः ॥ * ॥ युधिष्ठिरविक्रमादित्यशालिवाहनादिशकनरपतीनामतीताब्दः । तस्य प्रमाणं दिनपञ्जिकायां द्रष्टव्यम् ॥ ( शक्तिः । कर्म्म । यथा, ऋग्वेदे । ६ । २४ । ४ ।

"शचीवतस्ते पुरुशाक शाका
गवामिव स्रुतयः सञ्चरणीः ॥"

"हे पुरुशाक बहुकर्म्मन्निन्द्र शचीवतः प्रज्ञावतस्ते त्वदीयाः शाकाः शक्तयः कर्म्माणि वा ।" इति तद्भाष्ये सायणः ॥ * ॥ समर्थे, त्रि । यथा, ऋग्वेदे । ५ । ३० । १० ।

"सन्ता इन्द्रो अस्रजदस्य शाकै-
र्यदीं सोमासः सुषुता अमन्दन् ॥"

"शाकैः शक्तैर्म्मरुद्भिः सह ।" इति तद्भाष्ये सायणः ॥ )

शाकचुक्रिका, स्त्री, चिञ्चा । इति राजनिर्घण्टः ॥

शाकटं, त्रि, ( शकट + अण् । ) शकटस्येदम् । शकटवोढ़ा । इति मेदिनी ॥

शाकटः, पुं, श्लेष्मान्तकवृक्षः । इति राजनिर्घण्टः ॥ ( शकटं वहतीति । शकट + "शकटादण् ।" ४ । ४ । ८० । इत्यण् । ) युगादिवोढ़ा । तत्पर्य्यायः । युग्यः २ प्रासङ्ग्यः ३ । इत्यमरः ॥

शाकटाख्यः, पुं, ( शाकट इति आख्या यस्य । ) धववृक्षः । इति रत्नमाला ॥

शाकटायनः, पुं, (शकटस्यापत्यं पुमान् । शकट + "नड़ादिभ्यः फक् ।"४।१।९९। इति फक् ।) अष्टशाब्दिकान्तर्गतशाब्दिकविशेषः । यथा,—

"इन्द्रश्चन्द्रः काशकृत्स्ना पिशली शाकटा-
यनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥"

इति कविकल्पद्रुमः ॥

( अयन्तु नाममात्रं धातुनिष्पन्नमाह । यथा, कातन्त्रे कृत्सु उणादयो भूतेऽपि इत्यत्र त्रिलोचनः .

"नाम च धातुजमाह निरुक्ते
व्याकरणे शकटस्य च तोकः ।
यन्न पदार्थविशेषसमुत्थं
प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥")

शाकटिकः, त्रि, शकटगामी । शकटेन गच्छतीत्यर्थे ठक्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥ ( यथा, बृहत्संहितायाम् । १० । ४ ।

"रोहिण्यां कोशलमद्र-
काशिपाञ्चालशाकटिकाः ॥" )

शाकटीनः, पुं, विंशतितुलापरिमाणम् । तत्पर्य्यायः । भारः २ आचितः ३ शकटः ४ शलाटः ५ । इति हेमचन्द्रः ॥

शाकतरुः, पुं, ( शाकाख्यस्तरुः । ) शाकवृक्षः । इति शब्दमाला ॥ सागौन इति हिन्दी भाषा ॥

शाकपत्रः, पुं, शिग्रुः । इति राजनिर्घण्टः ॥

शाकवालेयः, पुं, ब्रह्मयष्टिः । इति शब्दरत्नावली ॥

शाकम्भरी, स्त्री, ( शाकेन बिभर्त्ति । भृ + खश् । ङीष् ।) दुर्गा । यथा,—

"ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥"

इति मार्कण्डेयपुराणे नारायणीस्तुतिः ॥

अपि च ।

"भूयः सुरास्तिष्ययुगे निराशना-
न्निरीक्ष्य मारीचगृहे समाश्रिता ।
लोकान् भरिष्यामि तनूजशाकै-
स्तदा भविष्यामि शाकम्भरीति ॥"

इति वामने ५३ अध्यायः ॥

नगरविशेषः । शाम्भरीति ख्यातः । इति केचित् ॥

शाकम्भरीयं, क्ली, आजमेराख्यदेशान्तर्गतशाम्भरनगरीयजलाशयविशेषोद्भवलवणम् । शाम्भर इति ख्यातम् । तत्पर्य्यायगुणा यथा,—

"शाकम्भरीयं कथितं गड़ाख्यं रोमकं तथा ।
गड़ाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम् ।
तीक्ष्णं व्यवायि सूक्ष्मञ्चाभिष्यन्दि कटुपाकि
च ॥"

इति भावप्रकाशः ॥

शाकयोग्यः, पुं, ( शाकस्य योग्यः । ) धान्यकम् । इति राजनिर्घण्टः ॥

शाकराजः, पुं, ( शाकानां राजा निर्दोषत्वात् । "राजाहःसखिभ्यष्टच् ।"५।४।९१। इति टच् । ) वास्तूकम् । इति राजनिर्घण्टः ॥

शाकलः, } पुं, शकलेन प्रोक्तमधीयते शाकलास्तेषां सङ्घोऽङ्को घोषो वा । "शाकलाद्वा ।" ४ । ३ । १२८ । इति अण् । परम्परासम्बन्धोऽङ्कः । इति सिद्धान्तकौमुदी ॥ ( द्वीपविशेषः । यथा, महाभारते । २।२६।६ ।
शाकलकः, }

"शाकलद्वीपवासाश्च सप्तद्वीपेषु ये नृपाः ।
अर्ज्जुनस्य च सैन्यैस्तैर्विग्रहस्तुमुलोऽभवत् ॥" )

शाकलिकः, त्रि, शाकलसम्बन्धी । "शकलकर्द्दमाभ्यामुपसंख्यानम् ।" ४ । २ । २ । इत्यस्य वार्त्तिकोक्त्या शाकलिकः कार्द्दमिकः । आभ्यामणपीति वृत्तिकारः । शाकलः । कार्द्दमः । इति सिद्धान्तकौमुदी ॥

शाकबिल्वः, पुं, ( शाके बिल्व इव । ) वार्त्ताकुः । इति जटाधरः ॥

शाकबिल्वकः, पुं, ( शाकबिल्व + स्वार्थे कन् । ) वार्त्ताकुः । इति त्रिकाण्डशेषः ॥